# Shri Gurubhajana Stotram

# શ્રીગુરુભજનસ્તોત્રમ્ ૨

## Document Information

Text title : Shri Gurubhajana Stotram 2

File name : gurubhajanastotram2.itx

Category : deities_misc, svAminArAyaNa, gurudev, stotra

Location : doc_deities_misc

Author : dInAnAtha bhaTTa

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# શ્રીગુરુભજનસ્તોત્રમ્ ૨

(સ્રગ્ધરા-છન્દ)
ધર્મસ્ત્યાજ્યો ન કૈશ્ચિત્ સ્વનિગમવિહિતો વાસુદેવે ચ ભક્તિ-
ર્દિવ્યાકારે વિધેયા સિતઘન-મહસિ બ્રહ્મણૈક્યં નિજસ્ય ।
નિશ્ચિત્યૈવાન્ય-વસ્તુન્યણુમપિ ચ રતિં સમ્પરિત્યજ્ય સન્ત-
સ્તન્માહાત્મ્યાય સેવ્યા ઇતિ વદતિ નિજાન્ ધાર્મિકો નીલકણ્ઠઃ ।
દૃષ્ટાઃ સ્પૃષ્ટા નતા વા કૃતપરિચરણા ભોજિતાઃ પૂજિતા વા
સદ્યઃ પુંસામઘૌઘં બહુજનિ-જનિતં ઘ્નન્તિ યે વૈ સમૂલમ્ ।
પ્રોક્તાઃ કૃષ્ણેન યે વા નિજહૃદયસમા યત્પદે તીર્થજાતં
તેષાં માતઃ પ્રસઙ્ગાત્ કમિહ નનુ સતાં દુર્લભં સ્યાન્મુમુક્ષોઃ ।
(વેતાલીય છન્દ)
ભવસમ્ભવ-ભીતિભેદનં સુખસમ્પત્કરુણા-નિકેતનમ્ ।
વ્રતદાનતપઃ ક્રિયાફલં સહજાનન્દગુરું ભજે સદા ॥ ૧॥

કરુણામય-ચારુલોચનં શરણાયાત-જનાર્તિમોચનમ્ ।
પતિતોદ્ધારણાય તત્પરં સહજાનન્દગુરું ભજે સદા ॥ ૨॥

નિજતત્ત્વપથાવબોધનં જનતાયાઃ સ્વત એવ દુર્ગમમ્ ।
ઇતિ ચિન્ત્ય ગૃહીતવિગ્રહં સહજાનન્દગુરું ભજે સદા ॥ ૩॥

વિધિશમ્ભુ મુખૈરનિગ્રહં ભવપાથોધિ-પરિભ્રમાકુલમ્ ।
અપિધાર્ય મનો નરપ્રભં સહજાનન્દગુરું ભજે સદા ॥ ૪॥

નિજપાદપયોજ-કીર્તનં સતતં સ્યાદ્ભવજીવગોચરમ્ ।
ઇતિ યઃ કુરુતે કૃતૂત્સવં સહજાનન્દગુરું ભજે સદા ॥ ૫॥

બહિરીક્ષણલોકમાનુષં નિજદત્તામ્બકદર્શિનાં હરિમ્ ।
ભજનીયપદં જગદ્ગુરું સહજાનન્દગુરું ભજે સદા ॥ ૬॥

શરણાગત-પાપપર્વતં ગણયિત્વા ન તદીયસદ્ગુણમ્ ।

અણુમપ્યતુલં હિ મન્યતે સહજાનન્દગુરું ભજે સદા ॥ ૭॥

ભવવારિધિમોક્ષસાધનં ગુરુરાજ-પ્રકટસ્વસઙ્ગમમ્ ।
પ્રકટીકૃતવાન્ કૃપાવશઃ સહજાનન્દગુરું ભજે સદા ॥ ૮॥

ભગવાન્ કૃપયા ત્વયા કૃતં જનતાયામુપકારમીદ્રશમ્ ।
ક્ષમતે પ્રતિકર્તુમત્ર કઃ કુરુતે દીન જનસ્તતોઽજલિમ્ ॥ ૯॥

ઇતિ શ્રી દીનાનાથભટ્ટવિરચિતં શ્રીગુરુભજનસ્તોત્રં સમ્પૂર્ણમ્ ।

---

*Shri Gurubhajana Stotram*

pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*